SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Special Issue, (December) 2025

# प्राचीनभारतवर्षे शिक्षासंस्थानानि : विशेषसन्दर्भे वैदिककालः

**Dr. Sanatan Das**
Assistant Professor
Department of Sanskrit
Bhatter College, Dantan (Autonomous)
Dantan, Paschim Medinipur, West Bengal, India
Email: dassanatan147@gmail.com

**Abstract:** "उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद्भारतं नाम भारती यत्र सन्ततिः॥" इति विष्णुपुराणवचनमद्यापि भारतवर्षस्य प्राचीनत्वमैतिह्यमयत्वमैतिहासिकप्रामाणिकत्वं तथा भौगोलिकवैचित्र्यं प्रतिपादयन्विद्वांसः सततमनुरञ्जयति। काले काले वैदेशिकैः साम्राज्यवादिभिः लुन्ठकैश्चेयं देवभूमिः भारतवर्षमाक्रान्तमपि तस्य भौगोलिक-सांस्कृतिकवैचित्र्यं तद्गौरवञ्चानुमात्रं नाक्षुन्नं जातम्। तथापि सर्वं कालाधीनत्वादेतद्देशस्यापि ऐतिहासिकः कोऽपि कालखण्डः कालक्रमश्च वैविध्यमयो दृश्यते। तत्र शासनव्यवस्थादिबहुविधेभ्यः कारणेभ्यः देशस्य शिक्षासंस्कृतिवैचित्र्यमपि काले काले बहुधा विभाजितम्। भारतवर्षस्य शिक्षाव्यवस्थाः शिक्षासंस्थानानि शिक्षणोपकरणानि अपि क्रमेण परिवर्तितानि। अद्यत्वे याः शिक्षाव्यवस्थाः यानि च शिक्षासंस्थानानि शिक्षणोपकरणानि वर्तन्ते प्रागाङ्ग्लशासनयुगे तादृशानि नासन्। अतः परिवर्तमानस्य देशस्यास्य कालखण्डाः विविधाः। अनेनैव क्रमेण वैदिकवाङ्मयस्य रचनाकालो वैदिककालः, बुद्धजन्मन आरभ्य प्राग्यवनशासनं यावत् बौद्धकालः इति, ततः यवनशासकानां कालो यवनकालः इति, तत्पश्चात् क्रमेण आङ्ग्लकालः स्वातन्त्र्योत्तरकालश्चेति कथ्यते।

भारतीयशिक्षापद्धतिः विश्वस्य प्राचीनतमासु शिक्षाव्यवस्थासु प्रसिद्धासीत्। अस्याः शिक्षापद्धत्याः मूलं वेदाः, उपनिषदः, गुरुकुलव्यवस्था च भवन्ति। अस्मिन् शोधपत्रे प्राचीनभारते वैदिककाले प्रतिष्ठितानि गुरुकुलपरिषदादिशिक्षासंस्थानानि प्रोस्तोष्यन्ते। भारतीयसंस्कृतेः मूलाधारं शिक्षया एव प्रतिष्ठितम्। प्राचीनकाले वैदिकज्ञानपरम्परा गुरुकुलकेन्द्रितशिक्षापद्धत्या, आचार्यशिष्यसम्बन्धेन च विकसिताभूत्। तत्र नैमिषारण्यम्, तक्षशिला, नालन्दा, विक्रमशिलादिशिक्षापीठाः न केवलं भारतस्य अपितु विश्वस्यापि प्रमुखानि विद्याकेन्द्राणि आसन्। नाममात्रेण एतेषां वैदिककालिकशिक्षासंस्थानानां स्वरूपमत्र यथामति उपस्थाप्यते।

**Keywords:** वेदाः, उपनिषदः, गुरुकुलम्, ऋषिः, ब्रह्मोद्यः, अग्रहारः, पारिषदः, विश्वविद्यालयः।

## उपक्रमः

विश्वस्य प्राचीनतमासु सभ्यतासु अन्यतमा खलु भारतीयसभ्यता। ऋग्वेदस्त्वस्य देशस्य प्राचीनतमः साहित्यिकनिदर्शनः। विद्वांसो वैदिककालनिर्धारणं विविधैः प्रमाणैः ईशवीयषष्ठशताब्द्याः पूर्वमेव कुर्वन्ति। एतस्मिन्काले शिक्षाव्यवस्था शिक्षणसंस्थानानि शिक्षार्थिनः शिक्षकाश्च सर्वाणि वर्णाश्रमप्रथान्तर्गतानि आसन्। पण्डितैः वैदिकयुगो भारतीयसभ्यताया प्रारम्भाद् बुद्धजन्मपर्यन्तं मन्यते। वैदिककाले वेदास्सर्वे तथा वेदाङ्गानि उपनिषदश्च समायान्ति। तदा शिक्षायाः सम्बन्धः वैज्ञानिकसिद्धान्तैः समाश्रित आसीदिति। ब्राह्मणक्षत्रियवैश्यशूद्रनामधेयाः चत्वारो वर्णाः स्वयम्भूब्रह्मणा सृष्टाः।[1] एतेषां निर्धारणमपि सोद्देश्यमासीत्।[2] ब्राह्मणाः अध्ययनाध्यापनेषु स्वजीवनमर्पितवन्त। क्षत्रियास्तु स्वजीवनं युद्धस्य कृते अर्पितवन्तः। ते शासनकार्यं परिचालयन्ति स्म। वैश्यास्तु वाणिज्यं कुर्वन्ति स्म। विविधैरुपायैर्ब्राह्मणक्षत्रियवैश्यानां सहाय्यमेव शूद्राणां परमो धर्म आसीदिति। जायमानाः मानवाः कर्मानुसारम् उच्चैर्भवितुमशक्नुवन्।[3] बाह्मणकुले समुत्पन्नः पुत्रः कदापि क्षत्रियः, कदापि वैश्यः, कदापि

शूद्रोऽपि भवितुं शक्नोति।[4] एवमेव शूद्राः अपि ब्राह्मणत्वं प्राप्तुं समर्था आसन्। योग्यतानुसारं मानवाः उच्चैः पदवीं प्राप्तुमशक्नुवन्। सर्वाः एव वर्णव्यवस्थाः कर्मणा सञ्चालिता न तु जन्मना आसीत्। तदुक्तं महाभारतस्य शान्तिपर्वणि—

"न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत्।
ब्राह्मणाः पूर्वसृष्टा हि कर्मभिर्वर्णतां गताः॥" (१२/१८६/१०)

प्राचीनभारते आश्रमव्यवस्थापि दृढतरासीत्। तत्र चत्वार आश्रमा आसन्। तद्यथा ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः संन्यासाश्रमश्चेति। महर्षिणा गौतमेन क्रमोऽयं चतुर्धा विभक्तः— ब्रह्मचारी, गृहस्थः, भिक्षुः वैखानसश्चेति। मनुष्याणां शतपरिमाणमायुरिति स्वीकृत्य आश्रमव्यवस्थाः विभक्ताः आसीत्। सर्वेष्वाश्रमेषु कर्तव्यतां प्रपूर्य आत्मा जन्ममरणक्रमात् मोक्षं प्राप्नोति। तत्र ब्रह्मचर्याश्रमे शिक्षायाः अभ्यासम्, गृहस्थाश्रमे गृहस्थव्यवस्थापकत्वात् संसारभारम्, वानप्रस्थाश्रमे सामाजिकानि बन्धनानि शिथिलयितुं व्यावर्तनं संन्यासाश्रमे च सर्वं परित्यज्य आश्रमगमनं भवति स्म।

**विद्यारम्भः**

भारतीयसंस्कृतिः संस्कारप्रधाना वर्तते। शैशवे मानवको भाषणभोजनादिषु स्वेच्छाचारी भवति। मौञ्जीबन्धनात् प्राक् बालस्य कश्चिद्धार्मिकः संस्कारः कर्तुं नैव शक्यते।[5] वरिष्ठेभ्यः सदस्येभ्यः बालस्य पञ्चमवर्षे अक्षरारम्भो भवति। एतत् 'अक्षरस्वीकरणम्' इत्युच्यते। गृहे एव सः शिष्टाचारस्य शिक्षामाप्नोति स्म। बालकस्य प्रथमः शिक्षकः पिता एवासीत्।[6] अक्षरस्वीकरणं न केवलं सामान्यानाम्, राजपुत्राणां कृतेऽप्यासीत्। संस्कारोऽयं विद्यारम्भनाम्नापि प्रसिद्धः आसीत्।

**उपनयनम्**

प्रारम्भिकशिक्षानन्तरमुपनयनसंस्कारो जायते स्म। स तु विविधानां वर्णानां कृते विविधो भवति स्म। तद्यथा ब्राह्मणस्य कृते गर्भाधानात् अष्टमवर्षे, क्षत्रियस्य एकादशवर्षे वैश्यस्य च कृते द्वादशवर्षे। उपनयनसंस्कारस्य सम्पादनं विविधासु ऋतुषु वर्तते। तद्यथा ब्राह्मणस्य वसन्ते, क्षत्रियस्य ग्रीष्मे वैश्यस्य च शरदे भवन्ति स्म। कथितञ्च आपस्तम्बधर्मसूत्रे— "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्। शरदि वैश्यम्।" (१/१/१९) उपनयनं तु जातस्य द्वितीयं जन्म इति मन्यते स्म। तदुक्तम्— "तद्द्वितीयं जन्म।" (गौतमधर्मसूत्रम् १/१०) येषाम् उपनयनसंस्कारो भवति स्म त एव द्विजाः इति कथ्यन्ते। त एव वैदिकज्ञानाय मन्त्राधिकारिणो मन्यन्ते येऽनेन संस्कारेण पूता आसन्। उपनयनसंस्कारः शरीरं पुनाति मस्तिष्कञ्च वैदिकज्ञानं धारयितुं योग्यं करोति। उपनयनशब्दार्थः उप-समीपे आनयनमर्थात् गुरोः सकाशे शिष्यानयनमध्यापयितुमिति। उपनयनस्यार्थः न केवलं गुरोः समीपे नयनमपितु ब्रह्मज्ञानस्य समीपेऽपि नयनम् इति भावार्थः।

**गायत्रीशिक्षा**

उपनयनसंस्कारस्य अन्तिमभागे गायत्रीशिक्षा भवति स्म। गायत्रीशिक्षणेन तु ब्रह्मचारिणः प्राणांस्त्रायते। तत्र प्रसिद्धा गायत्री ऋग्वेदे प्राप्यते— "ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥" (ऋग्वेदः ३/६२/१०) ब्रह्मचारिभिः प्रत्यहं गायत्रीजपं कर्तव्यमिति मनुना कथितम्।[7] उपनयनानन्तरं समित्पाणिः शिष्यः ब्रह्मचर्याश्रमपालनाय ज्ञानप्राप्त्यर्थं च श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसरति। तदुक्तं मुण्डकोपनिषदि— "तद्विज्ञानार्थं गुरुमभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।" (मुण्डकोपनिषद् १/२/१२) ब्रह्मनिष्ठो गुरुः उपनयमानं ब्रह्मचारिणं तिस्रः रात्रीः पालयित्वा

तस्य ज्ञानशरीरं जनयति स्म। तदुक्तं अथर्ववेदेषु— "आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः। तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः॥" (अथर्ववेदः ११/५/३) तस्माद्दिनात् ब्रह्मचारिणः माता सावित्री पिता तु स्वयमाचार्य एव भवति स्म। एवमासीद्वैदिककाले शिक्षाग्रहणपरम्परा या अद्यतने प्रायः दुर्लभा एव। तदा शिष्यस्य चयनमपि गुरवः संनिरीक्ष्य कुर्वन्ति स्म। तन्निमित्तं विविधाः उपायाः तैरनुसृताः।

**शिष्यस्य अर्हता**

वैदिकयुगे गुरवो नूतनानां छात्राणां चरित्रपरीक्षणं षण्मासपर्यन्तं कुर्वन्ति स्मः। छात्रः चरित्रवान् विद्यते न वेति संनिरीक्ष्य एव तेषां चयनं क्रियते स्म। दुष्टस्वभावस्य शिष्यस्य शोधनं दुष्करमेव इति तदा स्वीक्रियते स्म। चारित्रिकपरीक्षणमिदं षण्मासादधिकमपि कदाचिद्भवति स्म। उपयुक्तान् एव छात्रान् गुरवः शिष्यरूपेण ब्रह्मचर्यव्रतपालनाय आश्रमे पालयन्ति स्म तदा। तदुक्तमृग्वेदेषु—

"विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम्॥"

अन्तेवासिनां परीक्षणमावश्यकमासीत् शिक्षणात्पूर्वमेव पात्रतां विज्ञाय आचार्यः शिक्षयितुं प्रभवेत्। शिक्षा तु अपात्राय न दद्यात्। एकेन रूपकेण वर्णितमस्ति यद्विद्या स्वयमेव आचार्यस्य समीपमगच्छत्। अकथयत् यत् आचार्य! अहं तव निधिः, रक्ष मामिति। अत एव मह्यं सुशिष्यायैव दद्यादिति। शिष्यस्य परीक्षणं तस्य ज्ञानाहरणक्षमताज्ञानार्थमप्यावश्यकमासीत्। प्रज्ञायाः विकासोऽपि शास्त्रैर्भवितुं शक्यते, प्रज्ञायाः उत्पत्तिस्तु शास्त्रैर्न जायते। यः अन्धो भवति तस्य कृते दर्पणो निरर्थक एव। अतः सर्वथा शिष्याणामर्हतां योग्यतां वा गुरवः सुपरीक्ष्य संनिरीक्ष्य च तान् ब्रह्मचर्याश्रमच्छात्ररूपेण स्वीकुर्वन्ति स्म वैदिककाले।[8] एतन्न केवलं शिष्याय अपि तु गुरोः स्वपुत्रस्य कृतेऽपि परीक्षणमिदं प्रचलितमासीत्। वस्तुतः सच्छिशष्यान्वेषणमावश्यकमासीदित्याशयः।

**गुरुकुलम्**

प्राचीनभारते शिक्षायाः मूलरूपं गुरुकुलमासीत्। शिष्याणां प्रथमशिक्षासंस्थानमासीत् गुरुकुलमेव। अन्तेवासिनः शिष्या गुरुगृहे निवासं कृत्वा वेदाभ्यासं कुर्वन्ति स्म। तत्र तेषां केषाञ्चिन्नियमानां पालनं कर्तव्यमासीत्। रात्रौ छात्रस्तु गुरोः प्राक् जागर्ति स्म। प्रत्येकं दिवसे शिष्यः ब्रह्ममुहूर्ते उत्थाय नित्यकर्माणि सम्पादयेत्। ततः गुरोः समीपं गत्वा तस्य चरणस्पर्शेण स्नेहास्पदं भवेत्। गुरुपुत्रेण गुरुभार्यया च सहापि गुरुवद्व्यवहारः कर्तव्यः आसीत्। तदुच्यते वशिष्ठधर्मसूत्रे— "गुरुवद्गुरुपुत्रस्य वर्तितव्यमिति श्रुतिः।" (वशिष्ठधर्मसूत्रम् ७/२०) विद्यार्थीभिः सर्वदा गुरोराज्ञापालनं क्रियते। प्रतिदिनं सः वनादिन्धनं गुरुगृहम् आनयेत्। प्रातः सायं च जलव्यवस्थामपि कुर्यात्। उक्तं हि आपस्तम्बधर्मसूत्रे- "सायं प्रातरुदककुम्भमाहरेत्। सदारण्याविन्धनाहत्यो निवध्यात्॥" (आपस्तम्बधर्मसूत्रम् १/१/४) नियमपालकः शिष्यः अक्रुद्धो विनयी श्रद्धावान् आज्ञापालनकारी च भवेत्। गुरोः शब्दान् ध्यानेन श्रोष्यति। शिष्याश्च कदापि नोपानह-छत्र-रथेत्यादीनां सेवनं करिष्यति।[9] अध्यापनार्थं गुरुः सर्वदा शिष्यानाह्वयति स्म। तत्र वेदवेदाङ्गादिशास्त्राणां पारायणं पाठः व्याख्या च भवति स्म। पाठारम्भे छात्रः ओमिति शब्दमुच्चारयेत्। कदापि गुरुशिष्ययोर्मध्ये किमपि गच्छति चेत्तर्हि अध्यापकवन्दना पुनरपि विधेया। यदि कश्चित् मार्जारः शुनकः सर्पो मण्डूको वा गुरुशिष्ययोर्मध्ये पठनसमये गच्छति, तर्हि त्रिदिवसमुपवासः कर्तव्यः। एतेभ्यः पशुभ्योऽतिरिक्तमन्ये पशवो यदि पाठसमये गच्छन्ति तर्हि शिष्यः

स्वश्वासं त्रिवारं रुन्ध्यात्। शुद्धं नवनीतं च खादेत्। अतः उच्यते— "श्व-नकुल-सर्प-मण्डूक-मार्जाराणां त्र्यहमुपवासो विप्रवासश्च। प्राणायामा घृतप्राशनं चेतरेषाम्।" (गौतमधर्मसूत्रम् १/६४) छात्राः प्रयोजनानुसारं गुरुकुलं परिवर्तयितुमपि स्वतन्त्रा आसन्। गुरुकुले शिक्षणरीतिः- स्वाध्यायः, मननम्, चिन्तनम्, संवादः चेति क्रमेणासीत्। शिक्षायाः विषयाः— वेदाः, वेदाङ्गानि, न्यायः, व्याकरणम्, शास्त्राणि, अस्त्रविद्या, आयुर्वेदः, कला, गणितम्, ज्योतिषम् इत्यादयः आसन्। तदा शिष्याः गुरोः समीपे निवसन्तः सेवा, अनुशासनम्, सदाचारपालनं च अनिवार्यं मन्यन्ते स्म।

**ऋषिकुलम्**

वैदिककाले प्राचीनतमाः शिक्षणसंस्थाः ग्रामेषु आसन्। ऋषयस्तत्र संस्थानेषु प्रमुखाः आसन्। ते एव संस्थाः सम्यक्परिचालयन्ति स्म। तस्मादापस्तम्बधर्मसूत्रे उच्यते— "समानग्रामे च वसतामन्येषामपि वृद्धतराणामभिवादमभिवादयीत।" (आपस्तम्बधर्मसूत्रम् १/२/५) तत्र ऋषिगृहे अध्यापनं यज्ञरूपेण प्रचलति स्म। तत्र ऋषयः स्वपुत्रानपि प्रतिवेशिनां शिशुभिः सह अध्यापयन्ति स्म। ऋषिकुलं नदीतटे सङ्गमे वा भवन्ति स्म। कथितमस्ति ऋग्वेदेषु— "उपह्वरे गिरीणां सङ्गमे च नदीनाम्। धिया विप्रो अजायत।" (ऋग्वेदः ८/६/२८) आचार्याः शिष्यैः सह नैकदेशेषु परिभ्रमन्तः अपि स्वज्ञानं प्रायच्छन्।

**पारिषदो ब्रह्मोद्यो वा**

वैदिककाले विद्वज्जनानां पारिषदः ब्रह्मोद्यः वेत्यभिहिता विख्याताः संस्थाः आसन्। यत्र ऋषयो मनीषिणः ऋत्विजो ब्रह्मवादिनः विद्वांसश्च दार्शनिकविवादान् कुर्वन्ति स्म। छान्दोग्योपनिषत्सु (१.१.१०) ब्रह्मोद्यानां उल्लेखो दृश्यते। पारिषत्सु विद्वांसः ब्रह्मतत्त्वं विमृशन्ति। मनीषिणः परस्परं शास्त्रार्थेण श्रोतृणामाध्यात्मिकज्ञानविज्ञानविकासाय सदा प्रयत्नाः आसन्। तत्र विद्याप्राप्त्युपायः सम्यक्तया शिष्यान्बोधयति स्म। विख्याताश्च विद्वांसः तत्र शास्त्रार्थं प्रायः समागच्छन्ति स्म। शिष्याः अपि कौशलमिदं सानन्देन स्वायत्तीकुर्वन्ति स्म।

**आश्रमः**

वैदिककाले ऋषीणामाश्रमाः वस्तुतः शिक्षायाः प्राणकेन्द्रभूताः आसन्। आश्रमाणां परिवेशः सुरम्यः आध्यात्मिकश्चासीत्। यथा— मालिनीनदीतीरे कण्वाश्रमः स्वर्गमार्गे मारिचाश्रमश्चेति अभिज्ञानशकुन्तलानुसारेण। अग्यस्ताश्रमः रामायणानुसारणेति। अगस्त्याश्रमे रामो दशसंवत्सरान् न्यवसत्। तत्र अगस्त्यस्य शिष्याः परिवारसदस्या इव निवसन्ति स्म। आदिकवेर्वाल्मीकेराश्रमः तमसानदीतीरे आसीदिति तु प्रसिद्धमेव। वशिष्ठस्याश्रमः मेरुगिरौ आसीत्। महर्षेः भरद्वाजस्याश्रमो हरिद्वारे गङ्गातटे आसीत्। तत्र वेदवेदाङ्गैः सह अस्त्रशस्त्रादीनां शिक्षणव्यवस्था अपि सुचारुतया आसीत्। तत्रैव द्रोणाचार्येण धनुर्वेदशिक्षा प्राप्ता। वैयासिक्यमहाभारते मालिनीनदीतीरे कण्वाश्रमस्य नैसर्गिकरमणीयता विस्तरेण वर्णिता। व्यासाश्रमो हिमालयेऽवस्थितः इति श्रुयते एव। सर्वत्रैव आश्रमेषु शिष्या उषित्वा पठनपाठनं कुर्वन्ति स्म। कण्वस्तु कुलपतिरित्यभिधया अभिहितः आसीत्। अर्थात् प्रायः दशसहस्रान् छात्रान् पालयन्ति पोषयन्ति अपि। तदुच्यते— "मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यायपति विप्रर्षिरसौ कुलपतिः स्मृतः॥"

**अग्रहारः**

प्राचीनभारतीयशिक्षायाः विशेषाधारः आसीदग्रहारः इति। अग्रहारः इति शब्दः 'अग्रे ह्रियते' अर्थात् ब्राह्मणैःविद्वद्भिर्वा ग्रहीते इति धातुमूलं धत्ते। प्राचीनभारते दानशीलानां महाजनानां राजानां वा

भूमिदानविशेषाः अग्रहाराः आसन्। वेदविद्यायाः संरक्षणम्, ब्राह्मणानामध्ययनाध्यापनाय समर्थनम् ग्रन्थरचनायाः उत्साहवर्धनं विद्यासंरक्षणञ्चेत्यस्य अग्रहारस्य लक्ष्यमासीत्। वैयासिक्यमहाभारते भूमिदानस्य महत्वं स्पष्टतया प्रतिपादितमिति। तदनुसृत्य अग्रहाररूपेण भूमिदानस्य विधानमप्यभवत्। प्रधानतया ब्राह्मणानां भोजनोपायार्थं क्षेत्रादिरूपेण अग्रहाराः कल्प्यन्ते स्म। तेन अध्यापनादिकार्यैः तेषां शाश्वतीः वृत्तिर्जायते स्म। ब्राह्मणाः स्वकर्मसु सम्यक्प्रवृत्ताः स्युरित्येतदर्थं राज्ञा अग्रहाराः कल्पिताः वर्तन्ते। उपनिषत्सु जनकेन याज्ञवल्क्याय यद्राज्यदानं वर्णितं तत्तु वस्तुतोऽग्रहार एव। इदं तु ब्राह्मणेभ्यः साधारणं दानमासीत्। ऋषीणां कृते धृतराष्ट्रो ब्रह्मदेयाग्रहारान् दत्तवानिति महाभारते उच्यते— "ब्रह्मदेयाग्रहारांश्च प्रददौ स कुरूद्वहः" इति। अतः अग्रहारपरम्परया वैदिककालशिक्षणपरम्परा राजाश्रिता प्रजाकल्याणकरा आसीदिति। अग्रहाराः केवलं वासस्थानानि न आसन्, अपि तु पारम्परिकशिक्षायाः केन्द्रबिन्दवः आसन्। वेदवेदाङ्गाध्ययनाध्यापनम्, स्मृतिग्रन्थानामध्ययनम् दार्शनिकचर्चाः पुस्तकरचना इत्यादीन्यासन् अग्रहारेषु प्रचलितानि कार्याणि। विद्वन्निवासत्वादग्रहारः गुरुकुलव्यवस्थायाः विस्ताररूपेण शिक्षाग्रामः इव बभूव। अनेके प्रादेशिकविद्यापीठाः अग्रहाररूपेण एव विकसिताः। अग्रहारसमूहाः आधुनिककाले "Collegiate Settlements" इति कथ्यन्ते।

**तक्षशिलाविश्वविद्यालयः**

तक्षशिला इति विश्वस्य प्रसिद्धतमो विश्वविद्यालयः आसीत्। ख्रीष्टपूर्वसप्तशतकमस्य कालः इति मन्यन्ते विद्वांसः। तक्षशिला इति प्रदेशे स्वनामधन्याः अनेके आचार्याः निवसन्ति स्म वैदिककाले। भरतस्थापितं नगरमिदं गान्धारप्रदेशस्य राजधानी आसीत्। तक्षः नामधेयो राजा नगरस्यास्य शासकः पालकश्चासीत्।जनमेजयस्य सर्पयज्ञः तक्षशिलायामेव सञ्जातः इति वैयासिक्यमहाभारते वर्णितम्। तक्षशिलायां शतशो नैष्ठिकब्रह्मचारिणो वेदवेदाङ्गेषु शिल्पकलासु निष्णाताः आसन्। ते ऋषिप्रव्रज्यां गृहीत्वा आचार्यरूपेण तत्र वसतिं स्थापितवन्तः। तत्र शिष्या अपि सुदूरात् काशी-राजगृह-पञ्चाल-मिथिलोज्जयिनीप्रदेशेभ्यः समागत्य विद्योपार्जनं कुर्वन्ति स्म। आचार्याः तैः सह एव निवसन्ति स्म। तान्सम्यक् बोधयन्ति स्म। छात्रशिक्षकसम्बन्धस्तु गौरववर्धकः एव आसीत्तदा। वात्स्यायनः, कैरातः, जीवकः, कौटिल्यः, पाणिनिः इत्यादयः आचार्याः तक्षशिलायां विद्याभ्यासं अध्यापनञ्च कुर्वन्ति स्मेति बौद्धजातकग्रन्थेभ्यः विज्ञायते। अत्र अर्थशास्त्रम् आयुर्वेदः, शल्यचिकित्सा, व्याकरणम्, युद्धविद्या, नीतिशास्त्रं चेत्यादयः पाठ्यविषयाः आसन्।

**नालन्दाविश्वविद्यालयः**

यद्यपि नालन्दा बौद्धकालस्य सर्वातिप्रसिद्धं महाविहारम् आसीत्तथापि तस्य सूचना तु वेदान्तकाले एव अभवत्। नालन्दामहाविहारस्य कालः ख्रीष्टीय दशमशतकपर्यन्तमिति मन्यन्ते विद्वांसः। अत्र प्रायः दशसहस्रान् छात्रान् पाठदानार्थं पञ्चदशशतसंख्यकाः आचार्याः नियुक्ताः आसन्। धर्मगञ्ज नाम तस्य विशालग्रन्थालयः सर्वविदितः एव। विश्वविद्यालयेऽस्मिन् बौद्धदर्शनम्, न्यायशास्त्रं, तर्कशास्त्रं, गणितम्, चिकित्सा, वास्तुशास्त्रं, खगोलशास्त्रम्, योगशास्त्रं चेत्येते विषयाः पाठ्यरूपेण निर्धारिताः। तक्षशिला-नालन्दादयः एते विश्वविद्यालयाः वेदपरम्परायाः वैज्ञानिकदार्शनिकविमर्शात्मकपद्धतिम् अन्वगच्छन्।

**उपसंहृतिः**

प्राचीनभारतीयशिक्षासंस्थानेषु विद्यमानो विशालो ज्ञानवैभवो विश्वसभ्यतायाः आश्चर्यकरो विषयो वर्तते। गुरुकुलपरम्परा, विश्वविद्यालयव्यवस्था, विषयवैविध्यम्, आचारसमृद्धिः चेति

भारतीयज्ञानपरम्परायाः वैशिष्ट्यमासीत्। अद्याप्येतेषां परम्पराणां मूल्यानि विश्वे अनुसरणीयानि भवन्ति। भारतीयसंस्कृतौ शिक्षा केवलं ज्ञानार्जनस्य साधनं नासीत्, अपितु जीवनस्य समग्रविकासस्य मूलभूतस्तम्भः। वेदाः भारतीयज्ञानपरम्परायाः अमूल्यनिधयः भवन्ति। तेषामध्ययनेन धर्मः, विज्ञानम्, नीतिः, समाजव्यवस्था, आध्यात्मविद्या, छन्दः, संगीतम्, आयुर्वेदः च विकसिताः भवन्ति। अतो वेदानुसारिशिक्षासंस्थानानामध्ययनेन भारतीयविद्यापरम्परा विश्वेषु समुद्घाटिता भवन्ति। गुरुकुलम्, ब्रह्मोद्यः, अग्रहारः, तक्षशिलादिविद्यापीठानि च प्राचीनभारते एकं विशालं वेदाधारितज्ञानसागरं निर्मितवन्तः। तत्र वेदविद्यायाः संरक्षणम्, विद्वज्जनजीवनव्यवस्था, शास्त्रानां रक्षणम्, संस्कृतभाषायाः संवर्धनं च भवन्ति स्म। प्राचीनभारते शिक्षासंस्थानानि वेदपरम्परायाः आधाररूपेण प्रतिष्ठितानि। गुरुकुलव्यवस्था, पारिषदः, ऋषिकुलम्, आश्रमः, अग्रहारः इत्यादीनि शिक्षासंस्थानानि मानवीयवैज्ञानिकदार्शनिकविकासस्य केन्द्राणि आसन्। प्राचीनशिक्षाव्यवस्थाः शिक्षासंस्थानानि च यद्यपि समये परिवर्तितानि तथापि वेदानुगता शिक्षापद्धतिः अद्यापि भारतीयज्ञानपरम्परायाः प्राणभूता एव इत्यलं विस्तरेण।

## Endnotes

1. ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरूः तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥ (ऋग्वेदः १०/८०/१२)
2. ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरूद्भ्यः वैश्यं तपसे शूद्रम्। (यजुर्वेदः ३०/५)
3. जन्मना जायते शूद्रः संस्काराद्विज उच्यते। (शङ्करविग्विजयः)
4. शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्। क्षत्रिया जातमेवं तु विद्यात् वैश्यान्तथैव च॥ (मनुस्मृतिः २०/६५)
5. नास्य कर्म नियच्छन्ति किञ्चिदामौञ्जिबन्धनात्। वृत्या शूद्रसमो ह्येष यावद्वेदे न जायते॥ (बोधायनधर्मसूत्रम् १/२/६)
6. पुत्रायेव पितरा मह्यं शिक्षतम्। (ऋग्वेदः १०/३१/६)
7. ब्रह्मचारी प्रतिदिनं गायत्रीं जपेत्। (मनुस्मृतिः १०/१०४)
8. नापुत्राय दातव्यं नाशिष्याय दातव्यम्। (मैत्रायणब्राह्मणोपनिषद् ६/२१)
9. उपानही छत्रं यानमिति वर्जयेत्। (आपस्तम्बधर्मसूत्रम् १/२/७)

## Bibliography


- Altekar, A. S. *Education in Ancient India*. Nand Kishore & Bros., 1944.
- Atharvaveda. Edited by Ramswarup Sharma, Chowkhamba Vidyabhawan, 2003.
- Basu, Yogiraj. *Veder Parichay*. Firma KLM Private Limited, 2009.
- Bhattacharya, Haridas Siddhantavagish. *Mahabharatam*. Biswabani Prakashani, 1980.
- Chandogya Upanishad. Translated by Swami Gambhirananda, Advaita Ashrama, 2006.
- Ghosh, S. C. *History of Education in Ancient India*. Munshiram Manoharlal Publishers, 2011.
- Kalidasa. *Abhigyan Shakuntalam*. Edited by Dr. Rajdev Mishra, Ghanshyamdas & Sons, 2000.
- Mandukya Upanishad. Translated by Swami Gambhirananda, Advaita Ashrama, 2000.

- Manu. *Manusamhita*. Edited by Manabendu Bandyopadhyay, Sanskrit Pustak Bhandar, 2016.
- Radhakrishnan, S. *The Principal Upanishads*. George Allen & Unwin Ltd., 1953.
- Rigveda Samhita. Translated by Ramesh Chandra Dutt, edited by Abdul Aziz Al Aman, Haraf Prakashani, 2000.
- Sankaracharya. *Vivekachudamani*. Translated by Swami Vedantananda, Udbodhan Karyalaya, 2005.
- Upanishad. Gita Press, 2017.
- Yajurveda. Edited by Kanhaiyalal Joshi, Chowkhamba Oriental Publishers, 2000.